वंशवृद्धिकरं (वंशाख्यं) दुर्गा कवचं

वंशवृद्धिकरं (वंशाख्यं) दुर्गा कवचं

शनैश्चर उवाच |
भगवन् देवदेवेश कृपया त्वं जगत्प्रभो |
वंशाख्यं कवचं ब्रूहि मह्यं शिष्याय तेऽनघ |
यस्य प्रभावाद्देवेश वंशो वृद्धिर्हि जायते |

सूर्य उवाच |
शृणु पुत्र प्रवक्ष्यामि वंशाख्यं कवचं शुभं |
संतानवृद्धिर्यत्पाठाद्गर्भरक्षा सदा नृणां ||

वंध्याऽपि लभते पुत्रं काकवंध्या सुतैर्युता |
मृतवत्सा सपुत्रास्यात् स्रवद्गर्भा स्थिरप्रजा ||

अपुष्पा पुष्पिणी यस्य धारणाच्च सुखप्रसूः |
कन्या प्रजा पुत्रिणी स्यादेतत् स्तोत्र प्रभावतः |

भूतप्रेतादिजा बाधा या बाधा कलिदोषजा |
ग्रहबाधा देवबाधा बाधा शत्रुकृता च या ||

भस्मी भवंति सर्वास्ताः कवचस्य प्रभावतः |
सर्वे रोगाः विनश्यंति सर्वे बालग्रहाश्च ये ||अथ कवचं||
पूर्वे रक्षतु वाराही चाग्नेय्यामंबिका स्वयं |
दक्षिणे चंडिका रक्षेत् नैर्ऋत्यां शववाहिनी ||

वाराही पश्चिमे रक्षेद्वायव्यां च महेश्वरी |
उत्तरे वैष्णवी रक्षेत् ऐशान्यां सिंहवाहिनी ||

ऊर्ध्वं तु शारदा रक्षेदधो रक्षतु पार्वती |
शाकंभरी शिरो रक्षेन्मुखं रक्षतु भैरवी ||

कंठं रक्षतु चामुंडा हृदयं रक्षताच्छिवा |
ईशानी च भुजौ रक्षेत्कुक्षिं नाभिं च काळिका ||

अपर्णा ह्युदरं रक्षेत्कटिं बस्तिं शिवप्रिया |
ऊरू रक्षतु कौमारी जया जानुद्वयं तथा ||

गुल्फौ पादौ सदा रक्षेत् ब्रह्माणी परमेश्वरी |
सर्वांगानि सदा रक्षेत् दुर्गा दुर्गार्तिनाशिनी ||

नमो देव्यै महादेव्यै दुर्गायै सततं नमः |
पुत्रसौख्यं देहि देहि गर्भरक्षां कुरुष्व नः ||मूलमंत्रः||
ॐ ह्रीं ह्रीं ह्रीं श्रीं श्रीं श्रीं ऐं ऐं ऐं महाकाळी महालक्ष्मी महासरस्वती रूपायै नवकोटिमूर्त्यै दुर्गायै नमः ||

ॐ ह्रीं ह्रीं ह्रीं दुर्गार्तिनाशिनी संतानसौख्यं देहि देहि वंध्यत्वं मृतवत्सत्वं च हर हर गर्भरक्षां कुरु कुरु सकलां बाधां कुलजां बाह्यजां कृतां अकृतां च नाशय नाशय सर्वगात्राणि रक्ष रक्ष गर्भं पोषय पोषय सर्वोपद्रवं शोषय शोषय स्वाहा ||फलश्रुतिः||
अनेन कवचेनांगं सप्तवाराभिमंत्रितं |
ऋतुस्नात जलं पीत्वा भवेत् गर्भवती ध्रुवं |

गर्भपातभये पीत्वा दृढगर्भा प्रजायते |
अनेन कवचेनाथ मार्जिता या निशागमे ||

सर्वबाधाविनिर्मुक्ता गर्भिणी स्यान्न संशयः |
अनेन कवचेनेह ग्रंथितं रक्तदोरकं |

कटि देशे धारयंती सुपुत्रसुखभागिनी |
असूतपुत्रमिंद्राणां जयंतं यत्प्रभावतः ||

गुरूपदिष्टं वंशाख्यं कवचं तदिदं सदा |
गुह्यात् गुह्यतरं चेदं न प्रकाश्यं हि सर्वतः |
धारणात् पठनादस्य वंशच्छेदो न जायते ||

इति वंशवृद्धिकरं दुर्गा कवचं |